# अथ शुक्रकवचम्



मृणालकुन्देन्दुपयोजसुप्रभं पीताम्बरं प्रसृतमक्षमालिनम्
समस्तशास्त्रार्थविधिं महान्तं ध्यायेत् कविं वांछितमर्थसिद्धये।।1।।

शिरो मे भार्गवः पातु भालं पातु ग्रहाधिपः।
नेत्रे दैत्यगुरुः पातु श्रोत्रे मे चन्दनद्युतिः।।2।।

पातु मे नासिकां काव्यो वदनं दैत्यवन्दितः।
वचनं चोशनाः पातु कण्ठं श्रीकण्ठभक्तिमान्।।3।।

भुजौ तेजोनिधिः पातु कुक्षिं पातु मनोव्रजः।
नाभिं भृगुसुतः पातु मध्यं पातु महीप्रियः।।4।।

कटिं मे पातु विश्वात्मा ऊरू मे सुरपूजितः।
जानुं जाड्यहरः पातु जङ्घे ज्ञानवतां वरः।।5।।

गुल्फौ गुणनिधिः पातु पातु पादौ वराम्बरः।
सर्वाण्यङ्गानि मे पातु स्वर्णमालापरिष्कृतः।।6।।

य इदं कवचं दिव्यं पठति श्रद्धयान्वितः।
न तस्य जायते पीडा भार्गवस्य प्रसादतः।।7।।

।। इति ब्रह्माण्डपुराणे शुक्रकवचं सम्पूर्णम्।।